# shrImantrarAjapada stotram

# શ્રીમન્ત્રરાજપદસ્તોત્રમ્

## Document Information

Text title : shrii mantra raaja pada stotram

File name : padastotram.itx

Category : vishhnu, vishnu_misc, stotra, vishnu

Location : doc_vishhnu

Author : Traditional

Transliterated by : Vijayaraghavan Bashyam

Proofread by : Vijayaraghavan Bashyam

Latest update : January 21, 2005

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 8, 2021

*sanskritdocuments.org*

# શ્રીમન્ત્રરાજપદસ્તોત્રમ્

પાઞ્ચરાત્ર આગમીય અહિર્બુધ્ન્ય સંહિતાત્

શ્રીમન્ત્રરાજપદસ્તોત્રમ્

શ્રી ઈશ્વર ઉવાચ -

વૃત્તોત્ફુલ્લવિશાલાક્ષં વિપક્ષક્ષયદીક્ષિતમ્ ।
નિનાદત્રસ્તવિશ્વાણ્ડં વિષ્ણુમુગ્રં નમામ્યહમ્ ॥ ૧॥

સર્વૈરવધ્યતાં પ્રાપ્તં સબલૌઘં દિતેઃ સુતમ્ ।
નખાગ્રૈઃ શકલીચક્રે યસ્તં વીરં નમામ્યહમ્ ॥ ૨॥

પદાવષ્ટબ્ધપાતાલં મૂર્ધાવિષ્ટત્રિવિષ્ટપમ્ ।
ભુજપ્રવિષ્ટાષ્ટદિશં મહાવિષ્ણું નમામ્યહમ્ ॥ ૩॥

જ્યોતીંષ્યર્કેન્દુનક્ષત્રજ્વલનાદીન્યનુક્રમાત્ ।
જ્વલન્તિ તેજસા યસ્ય તં જ્વલન્તં નમામ્યહમ્ ॥ ૪॥

સર્વેન્દ્રિયૈરપિ વિના સર્વં સર્વત્ર સર્વદા ।
યો જાનાતિ નમામ્યાદ્યં તમહં સર્વતોમુખમ્ ॥ ૫॥

નરવત્ સિંહવચ્ચૈવ યસ્ય રૂપં મહાત્મનઃ ।
મહાસટં મહાદંષ્ટ્રં તં નૃસિંહં નમામ્યહમ્ ॥ ૬॥

યન્નામસ્મરણાદ્ ભીતાઃ ભૂતવેતાલરાક્ષસાઃ ।
રોગાદ્યાશ્ચ પ્રણશ્યન્તિ ભીષણં તં નમામ્યહમ્ ॥ ૭॥

સર્વોઽપિ યં સમાશ્રિત્ય સકલં ભદ્રમશ્નુતે ।
શ્રિયા ચ ભદ્રયા જુષ્ટો યસ્તં ભદ્રં નમામ્યહમ્ ॥ ૮॥

સાક્ષાત્સ્વકાલે સમ્પ્રાપ્તં મૃત્યું શત્રુગણાન્વિતમ્ । (શત્રુગણાનપિ)
ભક્તાનાં નાશયેદ્યસ્તુ મૃત્યુમૃત્યું નમામ્યહમ્ ॥ ૯॥

નમસ્કારાત્મકં યસ્મૈ વિધાયાઽઽત્મનિવેદનમ્ ।

ત્યક્તદુઃખોઽકિલાન્ કામાન્ અશ્નન્તં તં નમામ્યહમ્ ॥ ૧૦॥

દાસભૂતાઃ સ્વતઃ સર્વે હ્યાત્માનઃ પરમાત્મનઃ ।
અતોઽહમપિ તે દાસઃ ઇતિ મત્વા નમામ્યહમ્ ॥ ૧૧॥

ફલશ્રુતિઃ

શઙ્કરેણાદરાત્ પ્રોક્તં પદાનાં તત્ત્વનિર્ણયમ્ ।
ત્રિસન્ધ્યં યઃ પઠેત્ તસ્ય શ્રીર્વિદ્યાઽઽયુશ્ચ વર્ધતે ॥

ઇતિ શ્રીમન્ત્રરાજપદસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded by Vijayaraghavan Bashyam <वयस्य@यहूँओम्>

*shrImantrarAjapada stotram*

pdf was typeset on July 8, 2021

Please send corrections to *sanskrit@cheerful.com*